॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय ४१

ततः प्रस्थाप्य सुग्रीवस्तान्हरीन्दक्षिणां दिशम् ।
बुद्धिविक्रमसम्पन्नान्वायुवेगसमाञ्जवे ॥ १॥

अथाहूय महातेजाः सुषेणं नाम यूथपम् ।
तारायाः पितरं राजा श्वशुरभीमविक्रमम् ॥ २॥

अब्रवीत्प्राञ्जलिर्वाक्यमभिगम्य प्रणम्य च ।
साहाय्यं कुरु रामस्य कृत्येऽस्मिन्समुपस्थिते ॥ ३॥

वृतः शतसहस्रेण वानराणां तरस्विनाम् ।
अभिगच्छ दिशं सौम्य पश्चिमां वारुणीं प्रभो ॥ ४॥

सुराष्ट्रान्सह बाह्लीकाञ्शूराभीरांस्तथैव च ।
स्फीताञ्जनपदान्रम्यान्विपुलानि पुराणि च ॥ ५॥

पुंनागगहनं कुक्षिं बहुलोद्दालकाकुलम् ।
तथा केतकषण्डांश्च मार्गध्वं हरियूथपाः ॥ ६॥

प्रत्यक्स्रोतोगमाश्चैव नद्यः शीतजलाः शिवाः ।
तापसानामरण्यानि कान्तारा गिरयश् च ये ॥ ७॥

गिरिजालावृतां दुर्गां मार्गित्वा पश्चिमां दिशम् ।
ततः पश्चिममासाद्य समुद्रं द्रष्टुमर्हथ ।
तिमि नक्रायुत जलमक्षोभ्यमथ वानरः ॥ ८॥

ततः केतकषण्डेषु तमालगहनेषु च ।
कपयो विहरिष्यन्ति नारिकेलवनेषु च ॥ ९॥

तत्र सीतां च मार्गध्वं निलयं रावणस्य च ।
मरीचिपत्तनं चैव रम्यं चैव जटीपुरम् ॥ १०॥

अवन्तीमङ्गलोपां च तथा चालक्षितं वनम् ।
राष्ट्राणि च विशालानि पत्तनानि ततस्ततः ॥ ११॥

सिन्धुसागरयोश्चैव सङ्गमे तत्र पर्वतः ।
महान्हेमगिरिर्नाम शतशृङ्गो महाद्रुमः ॥ १२॥

तस्य प्रस्थेषु रम्येषु सिंहाः पक्षगमाः स्थिताः ।
तिमिमत्स्यगजांश्चैव नीडान्यारोपयन्ति ते ॥ १३॥

तानि नीडानि सिंहानां गिरिशृङ्गगताश् च ये ।
दृप्तास्तृप्ताश्च मातङ्गास्तोयदस्वननिःस्वनाः ।
विचरन्ति विशालेऽस्मिंस्तोयपूर्णे समन्ततः ॥ १४॥

तस्य शृङ्गं दिवस्पर्शं काञ्चनं चित्रपादपम् ।
सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः ॥ १५॥

कोटिं तत्र समुद्रे तु काञ्चनीं शतयोजनम् ।
दुर्दर्शां परियात्रस्य गता द्रक्ष्यथ वानराः ॥ १६॥

कोट्यस्तत्र चतुर्विंशद्गन्धर्वाणां तरस्विनाम् ।
वसन्त्यग्निनिकाशानां घोराणां कामरूपिणाम् ॥ १७॥

नात्यासादयितव्यास्ते वानरैर्भीमविक्रमैः ।
नादेयं च फलं तस्माद्देशात्किं चित्प्लवङ्गमैः ॥ १८॥

दुरासदा हि ते वीराः सत्त्ववन्तो महाबलाः ।
फलमूलानि ते तत्र रक्षन्ते भीमविक्रमाः ॥ १९॥

तत्र यत्नश्च कर्तव्यो मार्गितव्या च जानकी ।
न हि तेभ्यो भयं किं चित्कपित्वमनुवर्तताम् ॥ २०॥

चतुर्भागे समुद्रस्य चक्रवान्नाम पर्वतः ।
तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा ॥ २१॥

तत्र पञ्चजनं हत्वा हयग्रीवं च दानवम् ।
आजहार ततश्चक्रं शङ्खं च पुरुषोत्तमः ॥ २२॥

तस्य सानुषु चित्रेषु विशालासु गुहासु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २३॥

योजनानि चतुःषष्टिर्वराहो नाम पर्वतः ।
सुवर्णशृङ्गः सुश्रीमानगाधे वरुणालये ॥ २४॥

तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम् ।
यस्मिन्वस्ति दुष्टात्मा नरको नाम गुहासु च ॥ २५॥

तस्य सानुषु चित्रेषु विशालासु गुहासु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ २६ ॥

तमतिक्रम्य शैलेन्द्रं काञ्चनान्तरनिर्दरः ।
पर्वतः सर्वसौवर्णो धारा प्रस्रवणायुतः ॥ २७ ॥

तं गजाश्च वराहाश्च सिंहा व्याघ्राश्च सर्वतः ।
अभिगर्जन्ति सततं तेन शब्देन दर्पिताः ॥ २८ ॥

तस्मिन्हरिहयः श्रीमान्महेन्द्रः पाकशासनः ।
अभिषिक्तः सुरै राजा मेघवान्नाम पर्वतः ॥ २९ ॥

तमतिक्रम्य शैलेन्द्रं महेन्द्रपरिपालितम् ।
षष्टिं गिरिसहस्राणि काञ्चनानि गमिष्यथ ॥ ३० ॥

तरुणादित्यवर्णानि भ्राजमानानि सर्वतः ।
जातरूपमयैर्वृक्षैः शोभितानि सुपुष्पितैः ॥ ३१ ॥

तेषां मध्ये स्थितो राजा मेरुरुत्तमपर्वतः ।
आदित्येन प्रसन्नेन शैलो दत्तवरः पुरा ॥ ३२ ॥

तेनैवमुक्तः शैलेन्द्रः सर्व एव त्वदाश्रयाः ।
मत्प्रसादाद्भविष्यन्ति दिवारात्रौ च काञ्चनाः ॥ ३३ ॥

त्वयि ये चापि वत्स्यन्ति देवगन्धर्वदानवाः ।
ते भविष्यन्ति रक्ताश्च प्रभया काञ्चनप्रभाः ॥ ३४ ॥

आदित्या वसवो रुद्रा मरुतश्च दिवौकसः ।
आगम्य पश्चिमां सन्ध्यां मेरुमुत्तमपर्वतम् ॥ ३५ ॥

आदित्यमुपतिष्ठन्ति तैश्च सूर्योऽभिपूजितः ।
अदृश्यः सर्वभूतानामस्तं गच्छति पर्वतम् ॥ ३६ ॥

योजनानां सहस्राणि दशतानि दिवाकरः ।
मुहूर्तार्धेन तं शीघ्रमभियाति शिलोच्चयम् ॥ ३७ ॥

शृङ्गे तस्य महद्दिव्यं भवनं सूर्यसंनिभम् ।
प्रासादगुणसम्बाधं विहितं विश्वकर्मणा ॥ ३८ ॥

शोभितं तरुभिश्चित्रैर्नानापक्षिसमाकुलैः ।
निकेतं पाशहस्तस्य वरुणस्य महात्मनः ॥ ३९ ॥

अन्तरा मेरुमस्तं च तालो दशशिरा महान् ।
जातरूपमयः श्रीमान्भ्राजते चित्रवेदिकः ॥ ४० ॥

तेषु सर्वेषु दुर्गेषु सरःसु च सरित्सु च ।
रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ४१ ॥

यत्र तिष्ठति धर्मात्मा तपसा स्वेन भावितः ।
मेरुसावर्णिरित्येव ख्यातो वै ब्रह्मणा समः ॥ ४२ ॥

प्रष्टव्यो मेरुसावर्णिर्महर्षिः सूर्यसंनिभः ।
प्रणम्य शिरसा भूमौ प्रवृत्तिं मैथिलीं प्रति ॥ ४३ ॥

एतावज्जीवलोकस्य भास्करो रजनीक्षये ।
कृत्वा वितिमिरं सर्वमस्तं गच्छति पर्वतम् ॥ ४४ ॥

एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ।
अभास्करममर्यादं न जानीमस्ततः परम् ॥ ४५ ॥

अधिगम्य तु वैदेहीं निलयं रावणस्य च ।
अस्तं पर्वतमासाद्य पूर्णे मासे निवर्तत ॥ ४६ ॥

ऊर्ध्वं मासान्न वस्तव्यं वसन्वध्यो भवेन्मम ।
सहैव शूरो युष्माभिः श्वशुरो मे गमिष्यति ॥ ४७ ॥

श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्ट कारिभिः ।
गुरुरेष महाबाहुः श्वशुरो मे महाबलः ॥ ४८ ॥

भवन्तश्चापि विक्रान्ताः प्रमाणं सर्वकर्मसु ।
प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशम् ॥ ४९ ॥

दृष्टायां तु नरेन्द्रस्या पत्न्यामिततेजसः ।
कृतकृत्या भविष्यामः कृतस्य प्रतिकर्मणा ॥ ५० ॥

अतोऽन्यदपि यत्किं चित्कार्यस्यास्य हितं भवेत् ।
सम्प्रधार्य भवद्भिश्च देशकालार्थसंहितम् ॥ ५१ ॥

ततः सुषेण प्रमुखाः प्लवङ्गमाः
सुग्रीववाक्यं निपुणं निशम्य ।
आमन्त्र्य सर्वे प्लवगाधिपं ते
जग्मुर्दिशं तां वरुणाभिगुप्ताम् ॥ ५२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com